# स्वसङ्कल्पप्रकाशस्तोत्रम्

अनाराध्य राधापदाम्भोजरेणु
मनाश्रित्य वृन्दाटवीं तत्पदाङ्काम्।
असम्भाष्य तद्भावगम्भीरचित्तान्
कुतः श्यामसिन्धौ रसस्यावगाहः ॥१॥

नवं दिव्यं काव्यं स्वकृतमतुलं नाटककुलं
प्रहेलीर्गूढार्थाः सखि रुचिरवीणाध्वनिगतीः।
कदा स्नेहोल्लासैर्ललितललिताप्रेरणबलात्
सलज्जं गान्धर्वा सरसमसकृच्छिक्षयति माम्॥२॥

अलं मानग्रन्थैर्निभृतचटुमोक्षाय निभृतं
मुकुन्दे हा हेति प्रथयति नितान्तं मयि जने।
तदर्थं गान्धर्वाचरणपतितं प्रेक्ष्य कुटिलं
कदा प्रेमक्रौर्यात्प्रखरललिता भर्त्सयति माम्॥३॥

मुदा वैदग्ध्यान्तर्ललितनवकर्पूरमिलन
स्फुरन्नानानर्मोत्करमधुरमाध्वीकरचने।
सगर्वं गान्धर्वागिरिधरकृते प्रेमविवशा
विशाखा मे शिक्षां वितरतु गुरुस्तद्युतसखी॥४॥

कुहूकण्ठीकण्ठादपि कमनकण्ठी मयि पुन
र्विशाखा गानस्यापि च रुचिरशिक्षां प्रणयतु ।
यथाहं तेनैतद्युवयुगलमुल्लास्य सगणा
ल्लभे रासे तस्मान्मणिपदकहारानिह मुहुः ॥५ ॥

क्वचित्कुञ्जे कुञ्जे छलमिलितगोपालमनु तां
मदीशां मध्याह्ने प्रियतरसखीवृन्दवलिताम् ।
सुधाजैत्रैरन्नैः पचनरसविच्चम्पकलता
कृतोद्यच्छिक्षोऽहं जन इह कदा भोजयति भोः ॥६ ॥

क्वचित्कुञ्जक्षेत्रे स्मरविषमसङ्ग्रामगरिम-
क्षरच्चित्रश्रेणीं व्रजयुवयुगस्योत्कटमदैः ।
विधत्ते सोल्लासं पुनरसमयं पर्णकचयै
र्विचित्रं चित्रातः सखि कलितशिक्षोऽप्यनु जनः ॥७ ॥

परं तुङ्गाद्या यौवतसदसि विद्याद्भुतगुणैः
स्फुटं जित्वा पद्माप्रभृतिनवनारीर्भ्रमति या ।
जनोऽयं सम्पाद्य सखि विविधविद्यास्पदतया
तया किं श्रीनाथाच्छलनिहितनेत्रेङ्गितलवैः ॥८ ॥

स्फुरन्मुक्तागुञ्जामणिसुमनसां हाररचने
मुदेन्दोर्लेखा मे रचयतु तथा शिक्षणविधिम् ।
यथा तैः संक्लृप्तैर्दयितसरसीमध्यसदने

स्फुटं राधाकृष्णावयमपि जनो भूषयति तौ ॥९॥

अये पूर्वं रङ्गेत्यमृतमयवर्णद्वयरस

स्फुरद्देवीप्राथ्यं नटनपटलं शिक्षयति चेत्।

तदा रासे दृश्यं रसवलितलास्यं विदधतो

स्तयोर्वङ्के युञ्जे नटनपटुवीटिं सखि मुहुः ॥१०॥

सदक्षक्रीडानां विधिमिह तथा शिक्षयितुं सा

सुदेवी मे दिव्यं सदसि सुदृशां गोकुलभुवाम्।

तयोर्द्वन्द्वे खेलामथ विदधतोः स्फूर्जति तथा

करोमि श्रीनाथां सखि विजयिनीं नेत्रकथनैः ॥११॥

रहः कीरद्वाराप्यतिविषमगूडार्थरचनं

दले पाद्मे पद्यं प्रहितमुदयच्चाटुहरिणा।

समग्रं विज्ञायाचलपतिवलत्कन्दरपदे

तदभ्यर्णे नेष्ये द्रुतमति मदीशां निशि कदा ॥१२॥

अदभ्रं बिभ्राणौ स्मररणभरं कन्दरखले

मिथो जेतुं विद्वावपि निशितनेत्राञ्चलशरैः।

अपि क्लिद्यद्गात्रौ नखदशनशस्त्रैरपि दरा

त्यजन्तौ द्रष्टुं तौ किमु तमसि वत्स्यामि समये ॥१३॥

समानं निर्वाह्य स्मरसदसि सङ्ग्राममतुलं

तदाज्ञातः स्थित्वा मिलिततनु निद्रां गतवतोः।
तयोर्युग्मं युक्त्या त्वरितमभिसङ्गम्य कुतुकात्
कदाहं सेविष्ये सखि कुसुमपुञ्जव्यजनभाक् ॥१४॥

मुदा कुञ्जे गुञ्जद्भ्रमरनिकरे पुष्पशयनं
विधायारान्मालाघुसृणमधुवीटीविरचनम्।
पुनः कर्तुं तस्मिन्स्मरविलसितान्युत्कमनसो
स्तयोस्तोषायालं विधुमुखि विधास्यामि किमहम् ॥१५॥

जितोन्मीलन्नीलोत्पलरुचिनि कान्त्योरसि हरे
र्निकुञ्जे निद्राणां द्युतिविजितगाङ्गेयगुरुताम्।
कदा दृष्ट्वा राधां नभसि नवमेघे स्थिरतया
वलद्विद्युल्लक्ष्म्यां मुहुरिह दधे थुत्कृतिमहम् ॥१६॥

विलासे विस्मृत्य स्खलितमुरुरङ्गैर्मणिसरं
द्रुतं भीत्यागत्य प्रियतमसखीसंसदि ह्रिया।
तमानेतुं स्मित्वा तदविदितनेत्रान्तनटनैः
कदा श्रीमन्नाथा स्वजनमचिरात्प्रेरयति माम् ॥१७॥

क्वचित्पद्माशैव्यादिकवलितचन्द्रावलिमुरु
प्रियालापोल्लासैरतुलमपि धिन्वन्नघहरः।
कदा वा मत्प्रेक्षालवकलितवैलक्ष्यभरतः
क्व राधेत्याजल्पन्मलिनयति सर्वाः परमिमाः ॥१८॥

सगर्वाः संरुद्धय प्रखरललिताद्याः सहचरी
स्ततो दानं दर्पात्सखि मृगयता स्वं गिरिभृता।
विशाखा मन्नाथानयननटनप्रेरणबला
द्विधृत्यारान्नीता रुषमिह दधाना क्षिपतु नः॥१९॥

स्तनौ शैलप्रायावपि तव नितम्बो रथसमः
स्फुटं जीर्णा नौर्मे कलय तटिनीं वातविषमाम्।
कथं पारं गच्छेरिह निवस रात्राविति हरे
र्वचः श्रुत्वा राधा कपटकुपिता स्मेरयतु माम्॥२०॥

इदं स्वान्ते भुञ्जे कदलमपि यद्रङ्गणलता
भिधैकस्वर्वल्लीपवनलभनेनैव फलितम्।
तदभ्यासे स्फूर्जन्मदनसुभगं तद्युवयुगं
भजिष्ये सोल्लासं प्रियजनगणैरित्थमिह किम्॥२१॥

इति श्रीमद्रघुनाथदासगोस्वामिविरचितस्तवावल्यां स्वसङ्कल्पप्रकाशस्तोत्रं सम्पूर्णम्।